# मारीचोपपुराणम्

श्री महादेवाय नमः

वन्दे सच्चित्सुखमयं वेदान्तैकप्रगोचरम्
विज्ञानघनमानन्दमीश्वरं तं त्रयीमयम् १
सत्रान्ते मुनयस्सर्वे नैमिशारण्यवासिनः
आगतं पूजयामासुः रोमहर्षण नामकम् २
तैः पूजितो यथान्यायमुपाविष्टो वरासने
विनयात्तं तदा प्रोचुः मुनयो वीतकल्मषाः ३
मुनय ऊचुः
सूत सूत महाभाग पुराणार्थ विशारद
ब्रूहि पुण्य कथां साधो यत्र नो धर्मसंग्रहः ४
सूत उवाच
यत्पृष्टोऽहं भवद्भिस्तु सत्यपूतैः महाव्रतैः
साक्षादध्वरराजानं पूजयद्भिस्सदामखैः ५
पुरानन्दी मरीचाय यदुवाच शुभां कथाम्
तामद्यसंप्रवक्ष्यामि श्रुणुध्वं मुनिपुंगवाः ६
नमस्कृत्वा प्रमेयाय महादेवाय शंभवे
पुरुषाय पुराणाय त्रिमूर्तिजनकाय च ७
पुरा कैलासशिखरे नन्दिनं विश्वनन्दिनम्
रत्नपीठे सुखासीनं गणेशैः परितो व्रतम् ८
देवैर्विष्णवादिभिश्चैव मुनिभिश्चासुरैरपि
त्रिपुण्ड्रविलसत्फालं रत्नमुक्तावलंबिभिः ९
मालाभिश्शोभितो रस्कं रुद्राक्षाणां गणेश्वरम्
रत्नवेत्रलसत्पाणिं सुयशापतिमीश्वरम् १०
संस्थिता मन्दरप्रख्यं द्वितीयमिव शंकरम्

प्रणिपत्य मरीचस्तु ब्रह्मपुत्रो महायशाः ११
प्रह्वो बद्धांजलिपुटो उवाच सभयं पुरः
मरीचिरुवाच
भगवन् गणपति श्रेष्ठ शिलादतनधाव्यय १२
किं ध्येयं पूजनीयं किं किं सर्वैः प्रतिपादितम्
शास्त्रवेदागमैस्सर्वैः येन मुक्तिं प्रयान्ति च १३
तत् ब्रूहि कृपया नन्दिन् यतोऽहं भक्तिमान्त्वयि
मरीचि वचनं श्रुत्वा ईषत् स्मित्वा विलोक्य च १४
कम्पयित्वात्मनश्शीर्षं धन्योऽसीति बभाष्ण सः
श्री नन्दिकेश्वर उवाच
भक्तिमानसि विप्रेन्द्र यतस्त्वं ब्रह्मणस्सुतः १५
तादृशस्य तवाद्येव वक्ष्ये प्रश्नोत्तरं शुभम्
श्रुणुष्वेकमना विद्वन् रहस्याख्यानमुत्तमम् १६
यच्छ्रुत्वा मनुजस्सद्यो ज्ञानविन्मुक्तिमाप्नुयात्
नित्यो यो निष्कबोधश्च ब्रह्मविष्णवीश पूर्वजः १७
यस्य नो नाम जन्मादि रूपं वा सकलात्मकम्
स आत्मेत्युच्यते सर्वैः वेदान्तश्रवणादरैः १८
तस्मादाकाशमुत्पन्तं ततो वायुस्समुद्बभौ
ततः कृशानुस्संजज्ञे ततश्चापः प्रजज्ञिरे १९
तस्माद्वा पृथिवी जज्ञे तस्यामोषधयो भवन्
तद्रसात्पुरुषो जज्ञे ततस्सर्वाणि जज्ञिरे २०
इन्द्रियाणि च सर्वाणि तस्मात्सर्वगतश्शिवः
महान् प्रभुर्वै पुरुषः इति श्रुत्युर्विधीयते २१
स एवमाया याप्याहेत्यस्मादाद्यैः परीवृतः

क्रीडं तदेहवान् देही देहहीनो यथार्थतः २२
महत्भाग्यं महत्भाग्यम्मस्माकं यन्मुनीश्वर
तस्य भक्त्या तच्छ्रवणतः तद्धेहध्यानमात्रतः २३
मुक्ता भवन्ति मुनयो यदन्तो ये मुनीश्वराः
यजन्ती श्रुतिभिस्सर्वे नामरूपादिभिस्सुरान् २४
तमेव मोचकं प्राहुः प्रोक्तयं चापि सुरेश्वरम् २५
इति श्रीमन्मारीचोपपुराणे प्रथमोऽध्यायः

मरीचिरुवाच
तादृशस्त्याथ मे नन्दि भक्तिपोऽदः कथं वद
यया भक्त्या मुक्तिमापुः पूर्वं पूर्वे पुरा विदः १
श्रीनन्दिकेश्वर उवाच
धन्योऽसि कृतकृत्योऽसि यत्पच्छसि कथानकम्
बन्धुभिर्जन्मभिर्दुःखैः दुःखात्संसारमण्डले २
श्रान्तस्य पुण्यभारेण कच्चित् भक्तिर्भवेच्छिवे
तथा भक्त्या मुनिश्रेष्ठ मुक्तिमाप्नोति मानवः ३
[मरीचिरुवाच]
संसारे किं महा दुःखं दुःखं किं वा प्रजायते
तन्मे ब्रूहि महा श्रेष्ठ पृच्छतस्त्वां यथार्थवः ४
श्रीनन्दिकेश्वरः
संसारमण्डले दुःखं वक्ष्ये सर्वं तवाधुना
नष्टदेहस्य नरको तत्र दुःखं महत्तरम् ५
तत्र या तनया तीर्णः स्थावरादिषु जायते
तत्र गुल्मलतावृक्षशतैश्च विविधैर्भवेत् ६

तत्र वाता तपच्छेद दाहशीतांबुपीडितः
क्रिमिकीटाद्रियोनिस्थः क्षणे जातक्षणान्मुतः ७
बलीय सा पीड्यमानः कृमिणा भयपीडितः
जीवन् स जात्य शनन्ता सदा दुःखैकगोचरः ८
चतुष्पादो मृगाश्चैव पीड्यमानाः परस्परम्
संस्त्राजाति पयो ह्युत्ता मांसान्न प्रीतिमानसाः ९
क्षुत्तृष्णां मृगयाद्यैश्च व्याधैश्च परिपीडिताः
भवन्ति दुःखबहुला तस्माच्च द्विपदा स्मृताः १०
नाना जातिनराश्चैव संकराः पापयोनयः
तमो द्रित्ताल्पसत्वाच्च नानाकष्टैकजीवनाः ११
द्विपत्सु च ततो वर्णः ततश्शूद्रास्ततो विशः
ततः च क्षत्रिया जाताः ब्राह्मणाश्च ततः परम् १२
सर्वे तस्मात्समुत्पन्ना लोम ऊरूषु बाहुजाः
मुखपादोद्भवो ब्रह्मन् देव देवान् महेश्वरात् १३
सेवा च शूद्रसंघानां दुःखमेव सदा स्मृता
सेवा वसरवीत्या च ब्राह्मणानां मनोऽनुगाम्
तेषां कोपप्रहरणं भुक्तशेषप्रतीक्षणम्
वर्णजां च स्मृतं दुःखं भ्रुयविभ्रुयतस्स्मृतम् १५
अलाभे सर्ववस्तूनां लाभे चापि महर्घ्यता
रक्षणं भरणं वृद्धिः सर्वदा तन्निरीक्षणम् १६
अत्रियाणाञ्च दुःखानि श्रुणुष्वाव हितोऽनघ
स्वराज्य पालनं नित्यं ब्राह्मणानां तथा गवाम् १७
न्यायेनार्जनमर्थानां विप्रशापभयं तथा
आयुस्वजनबन्धूनां पालनञ्चापलायनम् १८

युद्धे शत्रुषु संक्रोधः व्यसनापानवर्जनम्
एतानि राज्ञां दुःखानि ब्राह्मणानामथोच्यते १९
उत्पन्नस्य तथा शौचं नित्यं स्वाध्यायसेवनम्
गुरुशिश्रूषणं चैव ततस्तानं तथार्जवम् २०
नित्यं दमश्चाग्निसेवा कर्मणाकरणं तथा
स्वशाखोक्तानि नित्यानि देवपैतृकपूजनम् २१
प्रत्यर्थं याचनं सत्सु लापमात्रगमस्तथा
अत्याशनादतीपानात्पापा नाम प्रतिग्रहः २२
स्वकुटुम्बाविरोधेन सदा चातिथिपूजनम्
अथ गर्भस्थितानां तु दुःखानि कथयाम्यहम् २३
यदा गर्भशतो जन्तुः पौर्वकं संस्मिन्हृदि माकुः
उदरसंस्थाञ्च पीडा हि मांसशोणितकल्ममे २४
अधोमुखः पीड्यमानो कट्वां म्लाहारदुःखितः
तदा स्मरति विश्वेशं पशुपाशप्रमोचकम् २५
स्थितं गर्भेषु बहुधा पीताश्च विविधास्तनाः
यदि योन्यां प्रमुच्यामि तं प्रपद्ये महेश्वरम् २६
एवं जल्पन् निर्गते तु योनियंत्रप्रपीडितः
मायया मोहितो बालः रौति स्तन्यं पिबन्ततः २७
क्रमेण वर्धते रोगैः बाध्यमानोऽतिपीडितः
कालेन यौपने प्राप्ते जातोऽपि विषयात्परः २८
निम्रां न लभते रात्रौ कामिनीं हृदि ये स्मरन्
तस्मिन्काले गते वृद्ध इन्द्रियाणामपाटवात् २९
जलान्नं याचते दारान् पुत्रैश्चापि स भक्ष्यते
एवं स्थितो रोगयुक्तो दुःखादेवादसून् त्यजेत् ३०

यमदूतैः पीड्यमानो धनदारासु तान् स्मरन्
एकाकी नीयते पापः तदा को न निश्चारकः ३१
पश्यत्सु बन्धुवर्गेषु विद्यमाने महाधने
कालकालादृतेनान्यः तस्माद्देवं समाश्रयेत् ३२
पुनश्च यातनाघोरा स्वर्गे च नरकेऽपि च
स्वर्गे पुण्याधिकं दृष्ट्वा स्वयं क्लिश्यत्यसूयया ३३
नरके यातनाघोरा न च केनापि सोच्यते ३४
इति श्री मारीचोपपुराणे
संसारदुःखनिरूपणं नाम द्वितीयोऽध्यायः

मरीचिरुवाच
श्रुत्वा मे हृदयं नन्दिर्न कंपते हृदयं सदा
त्वामेव शरणं या हि मुक्त्युपायं वदस्व मे १
त्वमेव मे गुरुत्राता पिता माता च सूव्रता
श्रीनन्दिकेश्वरः
मा भैषिर्वत्सभद्रं ते मुक्त्युपायं वदामि ते २
स्वतंत्रस्य महेशस्य लीले यं लोककारिणी
अशरीरं शरीरेषु अनवस्थेष्ववस्थितम् ३
महान्तं विभुमात्मानं मत्वाधीरो न शोचति ४
तमेव देवं परमं वरेण्यं हृदामपश्यन्ति मनसामनीषिणः
ज्ञाते तु तस्मिन्सुनिवृत्तकामाः तदा संपश्यते पुरुषं
रुक्मवर्णम् ५
तादृशं हृदयं सूक्ष्मं वालाग्रमात्रं हृदये प्रविष्टम्
पश्यन्ति तं यतयः क्षीणदोषाम्

निचार्यतं मृत्युमुखात्प्रमुच्यते ६
यस्य भासा सर्वमिदं यतो ब्रह्मादयस्सुराः
यस्य ज्ञानेन विज्ञानं विद्यते हृदयान्तरम् ७
यद्भीत्या सूर्यचन्द्राद्याः मृत्युरप्यनिशंस्थितः
यतो भूतानि जातानि यस्मिन् हि लयमेष्यति ८
निवर्तते यतो वाचः यत्ब्रह्मनिहितं परम्
गुहायां विश्वदेहस्थं नान्यः पन्थास्ति तत्र हि ९
कश्शोक एक आत्मानं दृष्टे तस्मिन् परावरे
ईशावास्यमिदं सर्वं यत्र धीरो न मुह्यति १०
य एनं विदुरीशानममृतास्ते भवत्युता
इतरे प्राप्नुवन्त्येव प्रागुक्तं दुःखमण्डलम् ११
जायते गच्छते यस्मात्तस्मात् जगति तीर्यते
अणोरणीयन्तदपाणिपद्ममशब्दमस्पर्शमतीन्द्रियञ्च १२
न तत्र कर्ता न च जन्म मृत्युः
ज्ञात्वा तमीशं न च तस्य शोकः
ब्रह्मैव सर्वं जगति प्रविष्टं
विलक्षणं सर्वगतं विभुत्वात् १३
स्थूलानि सूक्ष्माण्यपि देहजानि श्र—
त चान्ते विसृजत्यत्ति एकः
तस्मान्न चान्यं न च तत्र किञ्चित्
अस्मिन्निदन्तं तिलतैलवद्धि १४
स्वयैव गृह्णाति स्वमाययैव शुक्लं रजोऽजो स च एक एव
यस्माद्धरीश्चापि विधात्र शक्राः सुरासुराभूतभवास्थिताश्च
१५

जाता जनिष्या स च कालसंज्ञः
पुनश्च धात्रे प्रहिणोति वेदान्
तस्यैव सोऽध्यायति गुंश एकः
प्रादुर्बभौ भूतबीजो ललाटात् १६
आरोदमारोदिति तेन पृष्टे
रुद्रोऽभवत्तेन महेश्वरोऽसौ
तस्यैव माया जगतः प्रतिष्ठा
गुणात्मिका तेन स एव देवः १७
गृह्णाति देहं गिरिजेति तां हि
मायामयो मायिकया हि बुद्ध्या
स एव नित्योऽपि निरंजनोऽपि
सुभक्तसंरक्षणदेवयेऽनुः १८
ददाति भक्त्या हि सुपूजकाय लिंगे नले पुष्पवतोश्च बिम्बे
पुष्पेण नीरेण च पल्लवेन बिल्वस्य देवः परिपूर्णकामा १९
गृह्णाति भक्त्याननुग्रह्यमाणभा वैकलभ्यः न तु जिह्लभ्यः
पूर्वं मयोक्तं यतयो मुमुक्षवो युक्ता पुनर्वेदशिरैकनिष्ठाः २०
संत्यक्तपाशा भवमेकमीशं वेदान्तगं वाक्यविदो गृणन्तः
अकारमोंकारसमन्वितेन त्रिमात्रमात्रेण नमः परेण २१
शिवाय तद्वातमलाः प्रशान्ताः विभूतिसंपूजनमात्रहृदोः
सुशीर्णबिल्वादि फलप्रसूनैः संपूज्य लिंगं हृदि नतकामाः
२२
वेदान्तसम्यक् श्रवणान्वितेन
गुरुप्रसादेन शिवस्य भक्त्या
सर्वात्मकध्यानसमाधियुक्ता

विकल्पहीनास्सुखदुःखवर्जिताः २३
पश्यन्ति ते वीतमलाप्रशान्ता देवं ततो ब्रह्मणाछादिरूपम्
स एव ब्रह्म विष्णूनां काले गच्छेदवर्तिनाम् २४
गुरूणामपि विश्वात्मा गुरुः परमकारणम्
यस्य स्याद्देवदेवस्य शूलिनः प्रीतिरव्यया २५
इति श्री मारीचोपपुराणे तृतीयोऽध्यायः

श्रीशिवाय नमः
तस्य नैवोपसर्गा स्युः शिवजा भक्तिमान् भवेत्
नन्दिकेश्वरः
ब्राह्मण्यमपि संप्राप्य पंगुर्वा बधिरोऽपि वा १
अंधो वापि च मूको वा न भवेच्छापपीडितः
दधीचकण्वकपिलाशापग्रस्तोऽथ वा मुने २
मरीचिरुवाच
केन के शापिता पूर्वं ब्राह्मणाः केन हेतुना
श्री नन्दिकेश्वरः
पुरा नावृष्टिबहुलादभवत्तेन पीडिताः ३
ब्राह्मणा देशदेशान्वा सकुटुंबाग्निहोत्रिणः
वासिष्ठा आरुणेयाश्च वैश्वामित्रास्तथापरे ४
भृगवो जामदग्न्याश्च काश्यपा कावचेधकाः
समेत्य गौतमं प्राप्य नानादेशसमागताः ५
सुखासीनं महात्मानं स्वशिष्यैस्सह संवृतम्
ऋषिभिर्वेदवेदांगपारगैर्ब्रह्मवादिभिः ६
संस्थितं विष्टरे रम्ये ब्रह्माणमिव देवतैः

रुद्राक्षभस्माभरणम्मक्षमालालसत्करम् ७
तान् दृष्ट्वा सोऽपि चोत्काय गौतमो हृष्टमानसः
विष्टरे चोपविश्याथ कुशलश्चाब्रवीच्च तान् ८
देवापि कुशलं प्रोचुः
ऋषयो गौतमं मुनिः
अग्निहोत्रे स्वाश्रमे च शिष्यवर्गे तपादिषु ९
गौतमोऽपि मुनीन् प्राह योगक्षेममतन्द्रितः
पुनरूचिर्मुनिं भक्त्या ऋषयस्संशितव्रताः १०
ऋषय ऊचुः
भो गौतम महाभाग शिवभक्ततपोधन
दुर्भिक्षपीडितास्सर्वे क्षमधार्ता पीडितावयम् ११
तवाश्रमं समापन्नाः सकुडुंबाग्निहोत्रिणः
त्वयान्तपतिपादार्च्यात् कृतान्तं प्राप्तवानसि १२
अन्ते नः पालया ताशु अन्तमूलं तपो यतः
तथेति तेषां वचनं निशम्य मुनिपुंगवः १३
तानाश्वास्य यथान्यायं स्वाश्रमप्रान्ततो मुनीन्
वासयामास समुनिः कृत्वा कृत्वाश्रमान् ततः १४
तेषाञ्च प्रत्यहं विप्रो स्वतपो बलवर्द्धितान्
शालुन् पक्वान्यथान्यायं भोजयामास तान्मुनीन् १५
ततस्तस्याश्रमे पुण्ये वेदघोषसुनाद्रिते
विहंगजुष्टे धुमृगवृक्षपूगविराजिते १६
कालेन वृष्टिरभवत् दुर्भिक्षविनिवारिणी
ततस्ते मुनयस्सर्वे गौतमं प्रश्र्यरागताः १७
ऋषय ऊचुः

वयं स्वदेशं यास्यामो गौतमाद्य यथा तथा
त्वया संपूजितास्सम्यक् प्रीत्या दानेन सत्तम १८
यथा नैश्चन् मुनिवरः तेषां गमनकारणम्
मायया गौर्हता तेन इत्यजल्प्यमुनीश्वराः १९
मिथ्याभिशापश्रुत्वैव कोपमाहारयन्मुनिः
शशाप तान् द्विजान् सर्वान् रुद्रभक्तोऽथ गौतमः २०
गौतम उवाच
भो भो द्विजायमास्सर्वे पापिष्ठामित्रसातकाः
मिथ्याभिशंसिनस्सर्वे विप्राः पश्चिमबुद्धयः २१
भवन्तु ब्राह्मणा यूयं भवे भक्तिपरङ्मुखाः
सद्यमपापक्षयकरे विभूत्युद्धूळने तथा २२
भवन्तु विमुखा यूयं श्रीमद्रुद्राक्षधारणे
रुद्रव्रतेषु सर्वेषु तथा रुद्रालयेऽपि च २३
वारणं स्यात्तथा पुण्ये श्रीमद्रुद्रजपे तथा
तथैव वेदाधिक्रतौ वेदमार्गे त्रिपुण्ड्रके २४
भवन्तु ब्राह्मणा यूयं विमुखाः पापयोनयः
अंकितास्तप्त चक्राद्यैः विष्णवागमपरायणाः २५
विष्णुभक्तिच्छलेनैव विष्णुरप्यस्तु वो ध्रुवम्
नैव वः पालको भूयात् यतो वादात्मको हि सः २६
भवन्तु पुत्रपौत्राद्यैः शंभ्वार्छनपरङ्मुखाः
नरकं गर्भवासञ्च गच्छथ प्रतिजन्मनि २७
इति शप्स्योटजं यातः तेऽपि दुःखैरयुताययुः २८
इति श्री मारीचोपपुराणे गौतमशापे चतुर्थो ध्यायः

श्री मीनाक्षीसुन्दरेश्वराभ्यां नमः
तस्य शापेन ते घोराः ब्राह्मणाः पापयोनयः
प्रतिजन्मनि पापिष्ठा वेदमार्गबहिष्कृताः
शिवार्चनविहीनाश्च गच्छन्ति नरकं ध्रुवम् १
मरीचिः
कथं शिवार्चनविधिः वद श्री नन्दिकेश्वर
शिलादसूनो भगवन् करुणा वरुणालय २
श्री नन्दिकेश्वरः
श्रुणुष्व पद्मभूपुत्र त्वया पुत्रेण तारितः
ब्रह्मा कमलभूः पूर्वं विवादमगमद्धरेः ३
अविज्ञाय महादेवं जनकं परमेश्वरम्
अहं विश्वाधिको नेति विष्णुरप्याह पद्मजम् ४
एवं विवादमापन्नौ निशान्तिमुपजगृतुः
तयोस्तत्र प्रबोधाय तेजो माला समाकुलम् ५
सहस्रभास्करप्रख्यं ददर्शान्त उभावपि
निमील्य लोचने देवौ भीति दात्यन्तकी स्थितौ ६
तदा शुश्रवतुर्वाचमयं वां कारणं परम्
एष देवो महादेवो नीलग्रीवो विलोहितः ७
तदा प्रबुद्धौ तौ देवौ नेमदुर्धरणीतले
कृतांजली तुषुचतुर्देवलिंगा कृतिं शिवम् ८
नमस्ते हरिकेशाय महालिंगाय वेधसे
गूढाय स महामानाय नमो विश्वाधिकाय ते ९
नमः प्रतारणायाथ नीलग्रीवाय शंभवे
शंकराय पुराणाय पुरुषायाक्षराय च १०

तदा प्रादुरभूल्लिंगात् तेजोरूपधरच्छिवः
उमया सहितो नित्यः चन्द्रार्धकृतशेखरः ११
उवाच देवौ संप्रेष्य मन्दस्मित विलोचनः
ईश्वरः
भवन्तौ मोहितौ देवौ मामविज्ञाय दुर्मदौ १२
तस्मान्मोहे विनाशाय ऋधश्चोर्ध्वञ्च पश्यत
लिंगस्यार्चा प्रभावे न पुनर्मोहं विमुच्यथ १३
इति देवेन तौ देवौ शासितौ विधिमाधवौ
भूत्वा क्रोडास्सजाकारौ ऋदृष्टोर्ध्वमधश्च तौ १४
लिंगं संपूजतुः प्रीतौ ततो मोहविना कृतौ
तस्माल्लिंगार्चनं पुरायं श्रुगु वक्ष्यामि ते हि तम् १५
दानानि यज्ञा मन्त्राश्च पशुधर्माः फलप्रदाः
मुक्तिप्रदो यं धर्मश्च पतिधर्मः प्रकीर्तितः १६
मरीचः
कः पशुः पशुपश्चेति त्वयोक्तौ वद मे प्रभो
त्वद्विज्ञायाम्रतो भूयां तव भक्तो महामते १७
नन्दिकेश्वरः
रुद्रविष्णुविरिञ्चाद्याः स्तंबान्ताः पशवस्मृताः
तेषां पतिर्महादेवस्स तु पाशविमोचकः १८
पशूनेतान् निबध्नाति माया वंशेन शंकरः
स एव मोचको लिंगे इति भक्त्या प्रपूजितः १९
भवपाशेन बद्धानां नान्यत् भवविमोचकम्
विनाशिवार्चनं लिंगे त्रिशाखैः बिल्वपल्लवैः २०
ऋाद्रैरनाद्रैस्संपाद्य कृतस्नानाग्निपूजकः

उपलिप्य शुभं देशं यथा विभवमर्चयेत् २१
रुद्रसूक्तादिभिस्नात्वा स्वयं भस्मावकुरिडतः
अग्निरित्यादिभिस्सम्यक् कृत्पाशुपतव्रतः २२
ब्रह्मद्वीप ततो भोगैः विरज्य परमेश्वरम्
लिंगे संपूजयेत् भक्त्या सर्वपापैः विमुच्यते २३
एकाहमपि यो लिंगे सकृत् भक्त्या प्रपूजयेत्
तस्य पुरायस्य नान्तोऽस्ति कश्चिदाव्रतमानसः २४
दीपान् प्रज्वाल्य यत्नेन धूपवस्त्रादिकं तथा २५
नैवेद्यञ्च तांबूलं पीठच्छत्रादिदर्परणम्
चामरं व्यंजनं वाद्यं शंखकाह भैरिकाः २६
मृदंगमुरजावीणा संटाकांस्याय सोद्धवाः
पञ्चामृतैः पञ्चगव्यैः स्नपनं पार्श्वती पतेः २७
ग्रामधेनु प्रदानञ्च वितानार्परणमेव च
शिवालयस्य करणं सप्तभौमाष्टभौमिकं २८
आरामकरणञ्चैव पतिधर्माः प्रकीर्तिताः
अनेकधर्मनिष्ठश्चेत् बहुजन्मसु यो भवेत् २९
तस्य स्याच्चरमं जन्म मतिश्चेत्पतिधर्मसु
इदमेव मया प्रोक्तं सामान्या द्विस्तरान्न च ३०
भाग्यवानसि भूयस्त्वं मरीच श्रुणुमेव चः
सारात्सारं प्रोच्यमानं निबोधगदतो मम ३१
भक्त्यान्वितो महादेवं पूजयेत् सावधानतः
मुक्तिस्तद्वशगाभूयात् इति वेदानुशासनम् ३२
पुरा काश्मीरदेशीयः शूद्रः कश्चिन्मुरात्मवान्
स नित्यं पञ्च पाषाणां पात्तिपत् लिंगमस्तके ३३

ततो मांसञ्च भुक्त्वैव स्थितः सर्वतमस्तके
कदाचिद्यस्य पापस्य न लब्धः कोऽपि लोष्टकः ३४
लिंगे न दत्ता पाषाणा इति तत्र सुदुःखितः
पपात विलुठन् तत्र त्रिरात्रमवनीतले ३५
तस्माल्लिंगादुदभवत् करुणाकर ईश्वरः
तस्मै च दत्वा पाषाण प्राक्षेप्य लिंगमस्तके ३६
इति दत्वा तिरोधत्त सोऽपि सन्तान्ध्य भुक्तवान्
तस्मात् नियमतो ब्रह्मन् पूजनं कार्यमीश्वरे ३७
वरं प्राणस्य गमनं च्छेदनं शिरसस्तथा
न भोक्ष्येते ह्यनभ्यच्छ्य लिंगे देवं महेश्वरम् ३८
एवं संक्षेपतः प्रोक्तः तव धर्मस्सनातनः
पुण्यं स्वर्ग्यं पवित्रञ्च मारीचाख्यमिदम्महत् ३९
सर्वज्ञानरहस्यानां रहस्यमिदमुत्तमम्
पठतां शृणवतां वापि देवः क्षिप्रं प्रसीदति ४०
आद्यं कुमारकथितं नारदं नारसिंहकम्
आदित्यं कालिका सांबं दूर्वासं शिवधर्मकम् ४१
कापिलं भार्गवं पुण्यं पाराशरमनुत्तमम्
मारीचमिदमादृष्टं मया ते धर्मसंग्रहम् ४२
पुरा पञ्चमुखैः प्रोचे महादेवो घृणा निधिः
पञ्चाद्ध्यायमिदं पुण्यं पावनानाञ्च पावनम् ४३
एतत्ते कथितं सौम्य भव भक्तोऽसि वै मुने
नाभक्ता या विनीताय वेदहीनाय न क्वचित् ४४
देयमेतद्धि कथितं शिवज्ञानमनुत्तमम्
भक्ताय च विनीताय सम्यक् शुश्रूषवे त्वया ४५

देयं नान्यज्ञने विद्वन् एतद्धि मम शासनं
इति नन्दि वचः श्रुत्वा मरीचः नन्दिकेश्वरम् ४६
प्रणम्य पादौ तस्याज्ञां गृहीत्वा स्वाश्रमं ययौ
सूत उवाच
एतद्वः कथितं ज्ञानं गुह्यात् गुह्यतरं परम् ४७
मारीचमिदमाख्यातं गुरुणा मे प्रसादतः
भवन्तोऽपि जयन्त्वाशु महादेवं महेश्वरम् ४८
प्राप्यानुज्ञां मुनीन् नत्वा ययौ सूतो यथा गतम् ४९

इति श्रीमारीचोपपुराणे पञ्चमोऽध्यायः

ओम् मारीचोपपुराणं समाप्तम्

Descriptive Catalogue of Sanskrit Manuscripts in Madras, Vol. 4 Part 2 Upapuranas and Sthalamahatmyas,Mārīcopapurāṇa, D-2357, grantha script, 7 folios. (Government Oriental Manuscript Library in Madras).